http://www.howtoexam.com

Sanskrit - April - 07

Con. 23-07. PK-515

(OLD & REVISED COURSE)

(3 Hours) [ Total Marks : 100

N.B. (1) Answers to the **two** sections should be written in the **same** answer-book.
(2) **Figures** to the **right** indicate **full** marks.

**Section I**

**(OLD & REVISED COURSE)**

**अपरीक्षित कारकम् — विष्णु शर्मा — (50 Marks)**

1. Translate into your mother tongue any **three** passages of the following :— 18

खालीलपैकी कोणत्याही **तिहींचे** मातृभाषेत भाषांतर करा :—

(a) कुपुत्रोऽपि भवेत्पुंसां हृदयानन्दकारकः ।
दुर्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ॥
एवं च भाषते लोकश्चन्दनं किल शीतलम् ।
पुत्रगात्रस्य संस्पर्शश्चंदनादतिरिच्यते ॥

(b) एवं क्रमेण गच्छन्तोऽवन्तीं प्राप्ताः । तत्र क्षिप्राजले कृतस्नाना महाकालं प्रणम्य यावन्निर्गच्छन्ति, तावद् भैरवानन्दो नाम योगी संमुखो बभूव । ततस्तं ब्राह्मणोचित विधिना सम्भाव्य, तेनैव सह तस्य मठं जग्मुः। अथ तेन ते पृष्टाः-"कुतो भवन्तः समायाताः ? क्व यास्यथ ? किं प्रयोजनम् ?"

(c) तावत्स्यात्सुप्रसन्नास्यस्तावद् गुरुजने रतिः ।
पुरुषो योषितां यावन्न श्रृणोति वचो रहः ॥
एताः स्वार्थपरा नार्यः केवलं स्व सुखे रताः ।
न तासां वल्लभः कोऽपि सुतोऽपि स्वसुखं विना ॥

(d) तच्छ्रुत्वा राक्षसोऽपि व्यचिन्तयत्-"नूनं यथाहं, तथान्योऽपि कश्चिद्विकाल नामास्या हरणाय नित्यमेवागच्छति, परं सोऽप्येनां हर्तुं न शक्नोति । तत्तावदश्व रूपं कृत्वाश्वमध्यगतो निरीक्षयामि-किंरूपः सः किंप्रभावश्चेति ?" एवं राक्षसोऽश्वरूपं कृत्वाश्वानां मध्ये तिष्ठति । तथानुष्ठिते निशीथसमये राजगृहे कश्चिदश्वचौरः प्रविष्टः । स च सर्वानश्वान् अवलोक्य, तं राक्षसमश्वतमं विज्ञायाधिरूढः ।

(e) कास्मिंश्चित् सरोवरे भारुण्ड नाम पक्षी एकोदरः पृथग्ग्रीवःप्रतिवसति स्म। तेन च समुद्रतीरे परिभ्रमता किञ्चित्फलममृतकल्पं तरङ्गाक्षिप्तं सम्प्राप्तम् । सोऽपि भक्षयन्निदमाह–"अहो, बहूनि मयामृतप्रायाणि समुद्र कल्लोलाहृतानि फलानि भक्षितानि । परमपूर्वोऽस्यास्वादः । तत्किं पारिजात हरिचंदन तरुसम्भवम् ? किं वा किञ्चिदमृतमय फलमिदमव्यक्तेनापि विधिनापतितम् ।

2. (a) Explain with reference to the context any **three** of the following :— 15

खालीलपैकी कोणत्याही **तिहींचे** ससंदर्भ स्पष्टीकरण करा :—

(i) स्वर्गे स्पर्धते त्रिदशैः सह ।
(ii) यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।
(iii) स्वयं च सक्तुभिः पाण्डुरतां गतः ।
(iv) भवतो वृद्धभावाद् भुद्धिवैकल्यं सञ्जातम् ।
(v) परमेकाकिना न गन्तव्यम् ।

(b) Write short notes on any **three** of the following :— 9

खालीलपैकी कोणत्याही **तिहींवर** संक्षिप्त टीपा लिहा :—

(i) दरिद्रता (iv) सन्धि
(ii) औशनस् (v) यान ।
(iii) चाणक्य

[ TURN OVER

Click to download similar question papers from www.howtoexam.com just for free

http://www.howtoexam.com



3. Write Paragraphs on any **two** of the following :— 8

खालीलपैकी कोणत्याही **दोहोंवर** परिच्छेद लिहा :—

(a) सिंहकारक मूर्खब्राह्मण कथा
(b) रासभ शृगाल कथा
(c) क्षपणक कथा
(d) चन्द्र भूपति कथा

**OR**

Write a detailed note on पञ्चतंत्र of विष्णु शर्मा.

सविस्तरपणे विष्णु शर्मांच्या पञ्चतंत्रावर टीप लिहा.

**Section II**
**(Revised Course)**
**(नीतिशतक)**

4. Translate into your mother tongue any **three** of the following :— 18

खालीलपैकी कोणत्याही **तिहींचे मातृभाषेत** भाषांतर करा :—

(a) दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥
अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति ॥

(b) शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेण गोगर्दभौ ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्र प्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥

(c) प्रारभ्यते न खलु विघ्न भयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥

(d) यस्यास्ति वित्तं स नरः कुलीनः
सपण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्तिः ॥

(e) शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपाङ्गणगतः
खलो मनसि सप्त शल्यानि मे ॥

5. (a) Explain with reference to the context any **three** of the following :— 15

खालीलपैकी कोणत्याही **तिहींवर** ससंदर्भ स्पष्टीकरण करा :—

(i) महतां निः सीमानश्चरित्रविभूतयः ।
(ii) वाराङ्गनेव नृपनीतिरनेकरूपा ।
(iii) मैत्री खलसज्जनानाम् ।
(iv) प्रायेणाधममध्यमोत्तमगुणाः संसर्गतो जायते ।
(v) निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।

Click to download similar question papers from www.howtoexam.com just for free

http://www.howtoexam.com



(b) Write short notes on any **three** of the following :— 9
खालीलपैकी कोणत्याही **तिहींवर** संक्षिप्त टीपा लिहा :—

(i) मृगतृष्णिका
(ii) क्षितिः
(iii) विद्या
(iv) दानं
(v) नलिनीपत्र

6. Write paragraphs on any **two** of the following :— 8
खालीलपैकी कोणत्याही **दोहोंवर** परिच्छेद लिहा :—

(a) मूर्ख पद्धति (b) धैर्य पद्धति (c) विद्वद् पद्धति

**OR**

Write a detailed note on भर्तृहरि.
भर्तृहरींवर सविस्तर टीप लिहा.

---

**Section II**

**(Old Course)**

**ऋतु संहार (Selected verses)**

4. Translate into your mother tongue any **three** of the following :— 18
खालीलपैकी कोणत्याही **तिहींचे मातृभाषेत** भाषांतर करा :—

(a) सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नूनं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥

(b) निपातयन्त्यः परितस्तटद्रुमा–
न्प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः प्रहृष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥

(c) स्फुटकुमुदचितानां राजहंसाश्रितानां
मरकतमणिभासा वारीणा भूषितानाम्
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रतारावकीर्णम् ॥

(d) पाकं व्रजन्ति हिमजातशीतै–
राधूयमाना सततं मरुद्भिः ।
प्रिये प्रियङ्गुः प्रियविप्रयुक्ता
विपाण्डुतां याति विलासिनीव ॥

(e) प्ररूढाशालीक्षुचयावृतक्षितिं
क्वचित्स्थित क्रौञ्चनिनादराजितम् ।
प्रकामकामं प्रमदाजनप्रियं
वरोरु कालं शिशिराह्वयं श्रृणु ॥

[ TURN OVER

Click to download similar question papers from www.howtoexam.com just for free

http://www.howtoexam.com



5. (a) Explain with reference to the context any **three** of the following :— 15
खालीलपैकी कोणत्याही **तिहींवर** ससंदर्भ स्पष्टीकरण करा :—
   (i) ग्लपयति मृगवर्ग प्रान्तलग्नो दवाग्निः ।
   (ii) दिशतु तव हितानि प्रायशो वाञ्छितानि ।
   (iii) क्वापि प्रयाति सुभगा शरदागमश्रीः ।
   (iv) प्रदिशतु हिमयुक्तस्त्वेष कालः सुखं वः ।
   (v) निरीक्ष्यमाणा नवयौवनानाम् ।

(b) Write short notes on any **three** of the following :— 9
खालीलपैकी कोणत्याही **तिहींवर** संक्षिप्त टीपा लिहा :—
   (i) हिमागम (iv) क्षपा
   (ii) उपगीत (v) कूर्पासक।
   (iii) काम्य

6. Write paragraphs on any **two** of the following :— 8
खालीलपैकी कोणत्याही **दोहोंवर** परिच्छेद लिहा :—
   (a) वर्षाऋतु (b) ग्रीष्म ऋतु वर्णन (c) शरद ऋतु वर्णन (d) हेमंत ऋतु.

**OR**

Explain ऋतुसंहार as a खंड काव्य.
ऋतुसंहार खंड काव्य आहे — स्पष्ट करा.

HowToExam.com

Click to download similar question papers from www.howtoexam.com just for free